अनुकम्पायां कन्। बालके शिशौ। "तं त्वेणकुणकं कृपणं स्रोतसानुवाह्यमानमभीक्ष्य" "तस्य ह वा एण कुणके उच्चैस्तरामेतस्मिन् कृतनिजाभिमानस्याहरह स्तत्पोषणपालनप्रीणनलालनानुध्यानेन" "अहो बतायं हरिणकुणकः कृपणः" इति च भाग० ५,८,७,८,९, "एणकुणकं हरिणबालकम्" श्रीधरः।

**कुणञ्ज** पुंस्त्री० कुणं शब्दकारकं स्वरभेदं जरयति अन्तर्भूतण्यर्थे जृ बा० ड पृषो० मुम्। वनवास्तूके शाकभेदे (वनवेथुया) "कुणञ्जो मधुरो रुच्यो दीपनः पाचनो हितः। तच्छाकं तु त्रिदोषघ्नं मधुरं रुचिकारकम्। ईषत्कषायं संग्राहि पित्तश्लेष्महरं लघु" राजनि०। स्त्रीत्वमप्यत्र।

**कुणञ्जर** पु० कुणं जरयति हृ—बा० खच्। वनवास्तूके राजनि०

**कुणप** पु० क्वण—कपन् सम्प्र०। प्राणप्राणे मृतदेहे शवे अमरः "वाराणस्यां महाराज। दर्शनेप्सुर्महेश्वरम्। तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्। तं दृष्ट्वा यो निवर्त्तेत स संवर्त्तो महीपते!"। नारदोक्तौ "कुणपं स्थापयामास नारदस्य वचः स्मरन्। यौगपद्येन विप्रस्य पुरीद्वारमथाविशत्" "ततः स कुणपं दृष्ट्वा सहसा संन्यवर्त्तत" भा० आश्व० ६अ०। "शोणितवर्णं वेदनं कुणपगन्ध्यनल्पं रक्तेन" सुश्रु० अर्द्धः शोणपा०। २पूतिगन्धे पु० ३तद्वति त्रि०मेदि०। "कुणपं मस्तुलुङ्गाभं सुगन्धं कथितं बहु" भावप्र० "तस्य देवा यावन्मात्रमिव गन्धस्यापजघ्नुस्तं पशुष्वदधुः स एष पशुषु कुणपगन्धस्तस्मात् कुणपगन्धान्नापिगृह्णीत" शत० ब्रा० ४, १, ३, ८, । (बडुशा) ४अस्त्रभेदे। "शक्तिभिः कवचैश्चित्रैः कुणपैरङ्कुशैरपि" भा० भी० ५७अ०। कुणपलक्षणन्तु हेमा० प० ख० लक्षणसमुच्चये दर्शितं यथा

"जमदग्निं प्रति उशनाः प्रोवाच साधु पृष्टं कुणपानां विधानं यथादृष्टं कथयामि शृणु विंशत्यङ्गुलोऽष्टादशाङ्गुलः षोडशाङ्गुलश्चेति श्रेष्ठमध्याधमत्वेन कुणपोऽङ्गुलमाने त्रिविधोभवेदेवं पलप्रमाणे विंशतिपलः षोडशपलोद्वादशपलश्चेति। बालयोग्यानामेतत् प्रमाणमुक्तमबालानां तु कुणपस्त्रिंशत्पलः श्रेष्ठः पञ्चविंशतिपलोमध्यमः विंशतिपलस्तु निकृष्टः, श्रेष्ठस्तु विंशत्यङ्गुलो द्वाविंशत्यङ्गुलोमध्यमः कनिष्ठस्तु विंशत्यङ्गुलो भवेत्" कणपेति पाठान्तरम्। ५शवतुल्ये निश्चेतन्ये जड़े देहादौ "आश्चर्यमेतत् यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु" भाग० ४, ४, १४, "कुणपं जड़ं शरीरं तदेवात्मेति वदन्ति ये तेषु" श्रीधरः। गौरा० ङीष्। ६विट्शारिकायां (गुदयाशालिक) स्त्री०मेदि०

**कुणारु** त्रि० क्वण—शब्दे बा० आरु सम्प्र०। क्वणनशीले "सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र! संपिणक्कुणारुम्" ऋ० ३,३०,८, "कुणारुं क्वणनशीलम्" भा०।

**कुणाल** पु० क्वण—कालन् सम्प्र०। देशभेदे सि० कौ०।

**कुणि** पु० कुण—इन्। १तुन्दवृक्षे मेदि०। २आदानादिक्रिया मन्दकरान्विते त्रि० अम०। "दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति, सुश्रु०"गर्भो वातप्रकोपेण दौहृदे चावमानिते। भवेत्कुब्जः कुणिः पङ्गुः मूको मिन्मिण एव च" सुश्रु० कुणिभावः ष्यञ्। कौण्य हस्तस्यादानादिविघातरूपे दोषे "एकादशेन्द्रियवधाः" सा०का० व्याख्यायां कौमुद्यां "बाधिर्यं कुष्ठिताऽन्धत्वम् जडताऽजिघ्रता तथा। मूकता कौण्यपङ्गुत्वक्लैव्योदावर्त्तमन्दताः" इन्द्रियभेदेन क्रियाविघातभेदो दर्शितः।

**कुणिन्द** पु० क्वण—आवे किन्दच् सम्प्र०। शब्दे उज्ज्वलद०

**कुणिपदी** स्त्री कुणिरिव कुण्ठितशक्तिः पादोऽस्याः कुम्भपद्या० ङीष् पद्भावश्च। क्रियामन्दपादयुक्तस्त्रियाम्।

**कुण्टक** त्रि० कुटि—ण्वुल्। स्थूले शब्दरत्ना०।

**कुण्ठ** त्रि० कुठि—वैकल्ये अच्। १क्रियासु मन्दे अकर्मण्ये अमरः "पूर्वं तपोवीर्य्यमहस्य कुण्ठम्" कुमा० "विभावसोस्तुल्यमकुण्ठमण्डलम्" (सुदर्शनम्) भा०आ०१९अ०। २मूर्खे मेदि०। कर्त्तरि क्त कुण्ठित तदर्थे। "इतस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते" कुमा०।

**कुण्ठक** त्रि० कुठि—ण्वुल्। १सङ्कुचिते क्रियामन्दे। २मूर्खे पु० शब्दमा० ३तत्प्रधानदेशभेदे पु० भूम्नि। "मालवा वल्लवा श्चैव तथैवापरवल्लवाः। कुलिन्दाः कालकाश्चैव कुण्ठकाः करटास्तथा" भा०भी० ९ जनपदकथने।

**कुण्ड** न०कुण्ड्यते रक्ष्यते जलं वह्निर्वाऽत्र कुडि—रक्षणे आधारे—अच् खिलोपः। जलाधारे वृत्ताकारे १पात्रभेदे(कुण्डा) "भुवं कोष्णेन कुण्डोध्नी" रघुः "अतृसरकाः कुण्डप्रतिरूपाश्चमसाः" कात्या० श्रौ०२४,४,४, "अतृसरकाः अहन्तकाः कुण्डप्रतिरूपा वृत्ताकाराः"कर्कः। २देवादिखातजलाशये अगस्त्यकुण्डं सप्तर्षिकुण्डं सोमकुण्डम् ३कमण्डलौ स्त्री गौरा० ङीष् मेदि०। होमार्थमग्न्याधारे ४स्थानभेदे। तल्लक्षणादिकं हेमा० दा० ख० दर्शितं तथा।

"भविष्यत्पुराणे "वेदिपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च